अन्वयः-अधातोरत्वसन्तस्य चाङ्गस्य उपधाया असम्बुद्धौ सौ दीर्घः।

अर्थः-धातुवर्जितस्य अत्वन्तस्य असन्तस्य चाङ्गस्य उपधायाः सम्बुद्धिवर्जिते सौ परतो दीर्घो भवति।

उदा०-**(अत्वन्तः)** डवतु-भवान्। क्तवतु-कृतवान्। मतुप्-गोमान्। यवमान्। **(असन्तः)** सुपयाः। सुयशाः। सुस्रोताः।

आर्यभाषाः *अर्थ-(अधातोः) धातु से भिन्न (अत्वसन्तस्य) अतु-अन्तवाले और अस्-अन्तवाले (अङ्गस्य) अंग की (उपधायाः) उपधा को (असम्बुद्धौ) सम्बुद्धि से भिन्न (सौ) सु प्रत्यय परे होने पर (दीर्घः) दीर्घ होता है।*

*उदा०-(अत्वन्त) डवतु-**भवान्**। आप। **क्तवतु-कृतवान्**। उसने किया। **मतुप्-गोमान्**। गौवाला। **यवमान्**। जौवाला। (असन्त) **सुपयाः**। उत्तम दूध/जलवाला। **सुयशाः**। उत्तम कीर्तिवाला। **सुस्रोताः**। उत्तम स्रोतवाला।*

सिद्धि-(१) भवान्। *भा+डवतुप्। भा+अवत्। भ्+अवत्। भवंत्+सु। भवात्+सु। भवानुम् त्+सु। भवान्त्+०। भवान्०। भवान्।*

*यहां '**भा दीप्तौ**' (अदा०प०) धातु से '**भातेर्डवतुप्**' (उणा० १।६३) से 'डवतुप्' प्रत्यय है। वा०-'**डित्यभस्यापि टेर्लोपः**' (६।४।१४३) से 'भा' के टि-भाग (आ) का लोप होता है। इस सूत्र से अत्वन्त 'भवत्' अंग को 'सु' प्रत्यय परे होने पर दीर्घ होता है। तत्पश्चात् प्रत्यय के उगित् होने से '**उगिदचां सर्वनामस्थानेऽधातोः**' (७।१।७०) से 'नुम्' आगम है। यद्यपि 'नुम्' आगम पर और नित्य है किन्तु यह दीर्घ-विधि के पश्चात् ही किया जाता है क्योंकि प्रथम 'नुम्' आगम करने पर दीर्घ की निमित्तभूत उपधा का विघात होता जाता है। '**हल्ङ्याब्भ्यो दीर्घात्०**' (६।१।६८) से 'सु' का लोप और '**संयोगान्तस्य लोपः**' (८।२।२३) से तकार का लोप होता है।*

*(२) **कृतवान्**। कृ+क्तवतु। कृ+तवत्। कृतवत्+सु। कृतवात्+सु। कृतवा नुम् त्+सु। कृतवान्त्+सु। कृतवान्त्०। कृतवान्०। कृतवान्।*

*यहां '**डुकृञ् करणे**' (तना०उ०) धातु से '**निष्ठा**' (३।२।१०२) से भूतकाल में 'क्तवतु' प्रत्यय है। दीर्घ और 'नुम्' आदि कार्य पूर्ववत् हैं।*

(३) गोमान्। गो+मतुप्। गो+मत्। गोमत्+सु। गोमात्+सु। गोमानुम्त्+सु। गोमान्त्+सु। गोमानत्+०। गोमान्०। गोमान्।

*यहां 'गो' शब्द से 'तदस्यास्त्यस्मिन्निति मतुप्' (५।२।९४) से 'मतुप्' प्रत्यय है। दीर्घ और 'नुम्' आदि कार्य पूर्ववत् हैं। ऐसे ही-**यवमान्।***

(४) सुपयाः। सुपयस्+सु। सुपयास्+सु। सुपयास्+०। सुपयारु। सुपयार्। सुपयाः।

*यहां 'सुपयस्' शब्द से प्रथमा एकवचन की विवक्षा में 'सु' प्रत्यय है। इस सूत्र से असन्त 'सुपयस्' के उपधाभूत अकार को 'सु' प्रत्यय परे होने पर दीर्घ होता है। 'हल्ङ्याब्भ्यो दीर्घात्०' (६।१।६८) से 'सु' का लोप, 'ससजुषो रुः' (८।२।६६) से रुत्व और 'खरवसानयोर्विसर्जनीयः' (८।३।१५) से विसर्जनीय होता है। ऐसे ही-**सुयशाः, सुस्रोताः।***

दीर्घः-

(१५) अनुनासिकस्य क्विझलोः क्ङिति।१५।

प०वि०-अनुनासिकस्य ६।१ क्वि-झलोः ७।२ क्ङिति ७।१।

स०-क्विश्च झल् च तौ क्विझलौ, तयोः-क्विझलोः (इतरेतरयोगद्वन्द्वः)। कश्च ङश्च तौ क्ङौ, क्ङौ इतौ यस्य स क्ङित्, तस्मिन्-क्ङिति (इतरेतरयोगगर्भितबहुव्रीहिः)।

अनु-दीर्घः, अङ्गस्य, उपधाया इति चानुवर्तते।

अन्वयः-अनुनासिकस्याङ्गस्य उपधायाः क्विझलोः क्ङिति दीर्घः।

अर्थः-अनुनासिकान्तस्याङ्गस्य उपधायाः क्विप्प्रत्यये झलादौ च क्ङिति प्रत्यये परतो दीर्घो भवति।

उदा०-क्वौ-प्रशान्, प्रतान्। **झलादौ किति-**शान्तः, शान्तवान्, शान्त्वा, शान्तिः। **झलादौ ङिति-**तौ शंशान्तः, तौ तन्तान्तः।

***आर्यभाषाः** अर्थ-(अनुनासिकस्य) अनुनासिक अन्तवाले (अङ्गस्य) अंग की (उपधायाः) उपधा को (क्विझलोः) क्विप् प्रत्यय और झलादि (क्ङिति) कित्-ङित् प्रत्यय परे होने पर (दीर्घः) दीर्घ होता है।*

*उदा०-**क्वौ-प्रशान्।** उपशमन करनेवाला। **प्रतान्।** आकांक्षा करनेवाला। **झलादि कित्-शान्तः।** उपशमन किया। **शान्तवान्।** अर्थ पूर्ववत् है। **शान्त्वा।** उपशमन करके। **शान्तिः।** उपशमन करना। **झलादि ङित्-तौ शंशान्तः।** वे दोनों अधिक उपशमन करते हैं। **तौ तन्तान्तः।** वे दोनों अधिक आकांक्षा करते हैं।*

सिद्धि-प्रशान्। प्र+शम्+क्विप्। प्र+शम्+वि। प्र+शाम्+०। प्र+शान्+०। प्रशान्+सु। प्रशान्+। प्रशान्।

यहां प्र-उपसर्ग पूर्वक **'शमु उपशमे'** (दि०प०) धातु से **'क्विप् च'** (३।२।७६) से 'क्विप्' प्रत्यय है। इस सूत्र से अनुनासिकान्त 'शम्' धातु के उपधाभूत अकार को 'क्विप्' प्रत्यय परे होने पर दीर्घ होता है। **'मो नो धातोः'** (८।२।६४) से धातु के मकार को नकार आदेश होता है। **'हल्ङ्याब्भ्यो दीर्घात्०'** (६।१।६८) से 'सु' का लोप होता है। ऐसे ही- **'तमु काङ्क्षायाम्'** (दि०प०) धातु से-**प्रतान्।**

(२) **शान्तः।** शम्+क्त। शम्+त। शाम्+त। शा ं+त। शान्+त। शान्त+सु। शान्तः।

यहां **'शमु उपशमे'** (दि०प०) धातु से **'निष्ठा'** (३।२।१०२) से भूतकाल में 'क्त' प्रत्यय है। इस सूत्र से अनुनासिकान्त 'शम्' धातु के उपधाभूत अकार को झलादि 'क्त' प्रत्यय परे होने पर दीर्घ होता है। **'मोऽनुस्वारः'** (८।३।२३) से मकार को अनुस्वार और **'अनुस्वारस्य ययि परसवर्णः'** (८।४।५८) से अनुस्वार को परसवर्ण नकार होता है।

(३) **शान्तवान्।** यहां 'शमु उपशमे' (दि०प०) धातु से पूर्ववत् 'क्तवतु' प्रत्यय है। दीर्घ आदि कार्य पूर्ववत् हैं।

(४) **शान्त्वा।** यहां 'शमु उपशमे' (दि०प०) धातु से **'समानकर्तृकयोः पूर्वकाले'** (३।४।२१) से 'क्त्वा' प्रत्यय है। दीर्घ आदि कार्य पूर्ववत् हैं।

(५) **शान्तिः।** यहां **'शमु उपशमे'** (दि०प०) धातु से **'स्त्रियां क्तिन्'** (३।३।९४) से 'क्तिन्' प्रत्यय है। दीर्घ आदि कार्य पूर्ववत् हैं।

(६) **शशान्तः।** शम्+यङ्। शम्+शम्+य। श+शम्+य। श नुक्+शम्+य। शन्+शम्+०। शंशम्+लट्। शंशाम्+तस्। शं शा ं+तस्। शंशान्तस्। शंशान्तरु। शंशान्तर्। शंशान्तः।

यहां **'शमु उपशमे'** (दि०प०) धातु से **'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्'** (३।१।२२) से 'यङ्' प्रत्यय, **'सन्यङोः'** (६।१।९) से धातु को द्वित्व, **'नुगतोऽनुनासिकान्तस्य'** (७।४।८५) से अभ्यास को 'नुक्' आगम, **'यङोऽचि च'** (२।४।७४) से यङ् का लुक् होता है। तत्पश्चात् यङ्लुगन्त 'शंशम्' धातु से **'वर्तमाने लट्'** (३।२।१२३) से 'लट्' प्रत्यय, **'तिप्तस्झि०'** (३।४।७८) से 'तस्' लादेश, **'सार्वधातुकमपित्'** (१।२।४) से 'तस्' को ङित्त्व होकर इस सूत्र से अनुनासिकान्त 'शंशम्' धातु के उपधाभूत अकार को झलादि ङित् 'तस्' प्रत्यय परे होने पर दीर्घ होता है। ऐसे ही **'तमु काङ्क्षायाम्'** (दि०प०) धातु से-**तन्तान्तः।**

दीर्घः–

(१६) अज्झनगमां सनि।१६।

प०वि०–अच्-हन्-गमाम् ६।३ सनि ७।१।

स०–अच् च हन् च गम् च ते-अज्झनगमः, तेषाम्-अज्झनगमाम् (इतरेतरयोगद्वन्द्वः)।

अनु०–दीर्घः, अङ्गस्य, उपधायाः, झलि इति चानुवर्तते।

अन्वयः–अज्झनगमाम् अङ्गानाम् उपधाया झलि सनि दीर्घः।

अर्थः–अजन्तानाम् अङ्गानां हनिगम्योश्च अङ्गयोरुपधाया झलादौ सनि परतो दीर्घो भवति।

उदा०–**(अजन्तः)** चिचीषति। तुष्टूषति। चिकीर्षति। **(हन्)** जिघांसति। **(गम्)** अधिजिगांसते।

आर्यभाषाः *अर्थ-(अज्झनगमाम्) अजन्त अंगों और हन् और गम् (अङ्गस्य) अंगों की (उपधायाः) उपधा को (झलि) झलादि (सनि) सन् प्रत्यय परे होने पर (दीर्घः) दीर्घ होता है।*

*उदा०-(अजन्त) **चिचीषति।** वह चयन करना चाहता है। **तुष्टूषति।** वह स्तुति करना चाहता है। **चिकीर्षति।** वह करना चाहता है। (हन्) **जिघांसति।** वह हिंसा/गति करना चाहता है। (गम्) **अधिजिगांसते।** वह अध्ययन करना चाहता है।*

*सिद्धि-(१) **चिचीषति।** चि+सन्। ची+सन्। ची+ची+स। चिचीष+लट्। चिचीष+तिप्। चिचीष+शप्+ति। चिचीष+अ+ति। चिचीषति।*

*यहां '**चिञ् चयने**' (स्वा०उ०) धातु से '**धातोः कर्मणः समानकर्तृकादिच्छायां वा**' (३।१।७) से 'सन्' प्रत्यय है। इस सूत्र से अजन्त 'चि' धातु को झलादि सन् प्रत्यय परे होने पर दीर्घ होता है। तत्पश्चात् '**सन्यङोः**' (६।१।९) से दीर्घीभूत 'ची' धातु को द्वित्व होता है। पुनः सन्नन्त 'चिचीष' धातु से लट् आदि कार्य होते हैं।*

*(२) **तुष्टूषति।** यहां '**ष्टुञ् स्तुतौ**' (अदा०उ०) धातु से पूर्ववत् 'सन्' प्रत्यय है। '**शर्पूर्वाः खयः**' (७।४।६१) से अभ्यास को खय् तकार शेष रहता है। दीर्घ आदि कार्य पूर्ववत् है।*

*(३) **चिकीर्षति।** यहां '**डुकृञ् करणे**' (तना०उ०) धातु से पूर्ववत् 'सन्' प्रत्यय है। इस सूत्र से अजन्त 'कृ' धातु को झलादि 'सन्' प्रत्यय परे होने पर दीर्घ होता है। तत्पश्चात् '**ऋत इद्धातोः**' (७।१।१००) से ॠकार को इत्त्व, '**उरण् रपरः**' (१।१।५१)*

से इसे रपरत्व, 'हलि च' (८।३।७७) से दीर्घत्व और 'कुहोश्चुः' (७।४।६२) से अभ्यास को चुत्व होता है।

*(४) **जिघांसति।** यहां **'हन् हिंसागत्योः'** (अदा०प०) धातु से पूर्ववत् 'सन्' प्रत्यय है। इस सूत्र से 'हन्' धातु के उपधाभूत अकार को झलादि 'सन्' प्रत्यय परे होने पर दीर्घ होता है। तत्पश्चात् **'सन्यङोः'** (६।१।९) से द्वित्व, **'अभ्यासाच्च'** (७।३।५५) से 'हान्' के हकार के चुत्व घकार, **'कुहोश्चुः'** (७।४।६२) से अभ्यास के हकार के चुत्व झकार और **'अभ्यासे चर्च'** (८।४।५४) से जश्त्व जकार होता है।*

*(५) **अधिजिगांसते।** यहां अधि-उपसर्गपूर्वक **'इङ् अध्ययने'** (अदा०आ०) धातु से पूर्ववत् 'सन्' प्रत्यय है। 'इङश्च' (२।४।४८) से 'इङ्' को 'गमि' आदेश होता है। इस सूत्र से 'गम्' धातु के उपधाभूत अकार का झलादि 'सन्' प्रत्यय परे होने पर दीर्घ होता है। यहां 'इङ्' के स्थान में विहित 'गमि' आदेश का ग्रहण है, **'गम्लृ गतौ'** (भ्वा०प०) धातु का नहीं।*

दीर्घ-विकल्पः–

(१७) तनोतेर्विभाषा।१७।

प०वि०–तनोतेः ६।१ विभाषा १।१।

अनु०–दीर्घः, अङ्गस्य, झलि, उपधायाः, सनि इति चानुवर्तते।

अन्वयः–तनोतेरङ्गस्य उपधाया झलि सनि विभाषा दीर्घः।

अर्थः–तनोतेरङ्गस्य उपधाया झलादौ सनि परतो विकल्पेन दीर्घो भवति।

उदा०–तितांसति, तितंसति।

आर्यभाषाः *अर्थ-(तनोतेः) तनु इस (अङ्गस्य) अंग की (उपधायाः) उपधा को (झलि) झलादि (सनि) सन् प्रत्यय परे होने पर (विभाषा) विकल्प से (दीर्घः) दीर्घ होता है।*

*उदा०–**तितांसति, तितंसति।** वह विस्तार करना चाहता है।*

*सिद्धि–**तितांसति।** यहां **'तनु विस्तारे'** (तना०प०) धातु से **'धातोः कर्मणः समानकर्तृकादिच्छायां वा'** (३।१।७) से 'सन्' प्रत्यय है। इस सूत्र से 'तनु' अंग के उपधाभूत अकार को झलादि 'सन्' प्रत्यय परे होने पर दीर्घ होता है। तत्पश्चात् **'सन्यङोः'** (६।१।९) से धातु को द्वित्व, **'सन्यतः'** (७।४।७९) से अभ्यास को 'इत्त्व' और **'नश्चापदान्तस्य झलि'** (८।४।२७) से धातु के नकार को अनुस्वार होता है। विकल्प-पक्ष में दीर्घ नहीं है–**तितंसति।***

दीर्घ-विकल्पः–

(१८) क्रमश्च क्त्वि।१८।

प०वि०–क्रमः ६।१ च अव्ययपदम्, क्त्वि ७।१।

अनु०–दीर्घः, अङ्गस्य, उपधायाः, झलि, विभाषा इति चानुवर्तते।

अन्वयः–क्रमोऽङ्गस्य च उपधायाः झलि क्त्वि विभाषा दीर्घः।

अर्थः–क्रमोऽङ्गस्य चोपधाया झलादौ क्त्वा-प्रत्यये परतो विकल्पेन दीर्घो भवति।

उदा०–क्रान्त्वा, क्रन्त्वा।

आर्यभाषाः अर्थ–*(क्रमः) क्रम् (अङ्गस्य) अंग की (उपधायाः) उपधा को (झलि) झलादि (क्त्वि) क्त्वा प्रत्यय परे होने पर (विभाषा) विकल्प से दीर्घ होता है।*

उदा०–क्रान्त्वा, क्रन्त्वा। चलकर।

सिद्धि–क्रान्त्वा। *यहां 'क्रमु पादविक्षेपे' (दि०प०) धातु से 'समानकर्तृकयोः पूर्वकाले' (३।४।२१) से 'क्त्वा' प्रत्यय है। इस सूत्र से 'क्रम्' अंग के उपधाभूत अकार को झलादि 'क्त्वा' प्रत्यय परे होने पर दीर्घ है। विकल्प-पक्ष में दीर्घ नहीं है-**क्रन्त्वा।***

।। इति दीर्घप्रकरणम्।।

आदेश-प्रकरणम्

श-ऊठ्–

(१) च्छ्वोः शूडनुनासिके च।१६।

प०वि०–च्छ्-वोः ७।२ श्-ऊठ् १।१ अनुनासिके ७।१ च अव्ययपदम्।

स०–च्छश्च वश्च तौ च्छ्वौ, तयोः–च्छ्वोः (इतरेतरयोगद्वन्द्वः)। शश्च ऊठ् च एतयोः समाहारः-शूठ् (समाहारद्वन्द्वः)।

अनु०–अङ्गस्य, क्विझलोः, क्ङिति इति चानुवर्तते।

अन्वयः–अङ्गस्य च्छ्वोरनुनासिके क्विझलोः क्ङिति च शूठ्।

अर्थः–अङ्गस्य च्छकार-वकारयोः स्थानेऽनुनासिकादौ, क्वौ, झलादौ क्ङिति च परतो यथासंख्यं श-ऊठावादेशौ भवतः।

उदा०–**अनुनासिकादौ**–प्रश्नः, विश्नः (शादेशः)। स्योनः (ऊडादेशः)। **क्वौ**–शब्दप्राट्, गोविट् (शादेशः)। अक्षद्यूः। हिरण्यद्यूः।

(ऊठ्)। **झलादौ किति**–पृष्टः, पृष्टवान्, पृष्ट्वा (शादेशः)। द्यूतः, द्यूतवान्, द्यूत्वा (ऊठ्)।

आर्यभाषाः अर्थ-(अङ्गस्य) अंग के (च्छ्वोः) च्छकार और वकार के स्थान में (अनुनासिके) अनुनासिक आदि, (क्वौ) क्विप् और (झलि) झलादि (क्ङिति) कित् तथा ङित् प्रत्यय परे होने पर (च) भी यथासंख्य (शूठ्) शकार और ऊठ् आदेश होते हैं।

*उदा०–अनुनासिकादि-**प्रश्नः।** पूछना। **विश्नः।** गति करना (शादेश)। **स्योनः।** सुखी (ऊठ्)। **क्वौ–शब्दप्राट्।** शब्द को पूछनेवाला। **गोविट्।** गौ को प्राप्त करनेवाला (शादेश)। **अक्षद्यूः।** पासों से खेलनेवाला-जुआरी। **हिरण्यद्यूः।** स्वर्ण का व्यवहार करनेवाला-स्वर्णकार। (ऊठ्)। **झलादि कित्-पृष्टः।** पूछा। **पृष्टवान्।** पूछा। **पृष्ट्वा।** पूछकर (शादेश)। **द्यूतः।** जूआ खेला। **द्यूतवान्।** जूआ खेला। **द्यूत्वा।** जूआ खेलकर। (ऊठ्)।*

*सिद्धि-(१) **प्रश्नः।** प्रच्छ्+नङ्। प्रश्+न। प्रश्न+सु। प्रश्नः।*

*यहां **'प्रछ ज्ञीप्सायाम्'** (भ्वा०प०) धातु से **'यजयाचयतविच्छप्रच्छरक्षो नङ्'** (३।३।९०) से 'नङ्' प्रत्यय है। इस सूत्र से 'प्रछ्' के च्छकार को अनुनासिकादि 'नङ्' प्रत्यय परे होने पर शकार आदेश होता है। ऐसे ही **'विछ गतौ'** (तु०प०) धातु से–**विश्नः।***

*(२) **स्योनः।** सिव्+न। सि ऊठ्+न। सि ऊ+न। स्यू+न। स्यो+न। स्योन+सु। स्योनः।*

*यहां **'षिवु तन्तुसन्ताने'** (दि०प०) धातु से **'सिवेष्टेर्यु च'** (उणा० ३।९) से बहुवचन से केवल 'न' प्रत्यय है। इस सूत्र से 'सिव्' के वकार को अनुनासिकादि 'न' प्रत्यय परे होने पर 'ऊठ्' आदेश होता है। **'इको यणचि'** (६।१।७६) से यण्-आदेश और **'सार्वधातुकार्धधातुकयोः'** (७।३।८४) से गुण होता है।*

*(३) **शब्दप्राट्।** शब्द+प्रच्छ्+क्विप्। शब्द+प्राश्+वि। शब्द+प्राश्+०। शब्दप्राष्। शब्दप्राड्। शब्दप्राट्।*

*यहां शब्द उपपद **'प्रछ ज्ञीप्सायाम्'** (भ्वा०प०) धातु से **'क्विब् वचिप्रच्छि-श्रिस्रुद्रुप्रुज्वां दीर्घोऽसम्प्रसारणं च'** (उणा० २।५८) से 'क्विप्' प्रत्यय, दीर्घ और **'ग्रहिज्यावयि०'** (६।१।१६) से प्राप्त सम्प्रसारण का प्रतिषेध है। इस सूत्र से 'प्रच्छ्' के च्छकार को शकार, **'व्रश्चभ्रस्ज०'** (८।२।३६) से शकार को षकार, **'झलां जशोऽन्ते'** (८।२।३९) से षकार को जश् डकार और **'वाऽवसाने'** (८।४।५६) से डकार को चर् टकार होता है।*

(३) अक्षद्यूः । अक्ष+दिव्+क्विप् । अक्ष्+दि ऊठ्+वि० । अक्ष+ दि ऊ+० । अक्षद्यू+सु । अक्षद्यूः ।

*यहां अक्ष-उपपद '**दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदस्वप्नकान्तिगतिषु**' (दि०आ०) धातु से '**क्विप् च**' (३।२।७८) से 'क्विप्' प्रत्यय है। इस सूत्र से 'दिव्' के वकार को 'क्विप्' प्रत्यय परे होने पर ऊठ् आदेश होता है। '**इको यणचि**' (६।१।७६) से 'यण् आदेश होता है। ऐसे ही-**हिरण्यद्यूः** ।*

(५) पृष्टः । प्रच्छ्+क्त । प्रच्छ्+त । पृश्+त । पृष्+त । पृष्+ट । पृष्ट+सु । पृष्टः ।

*यहां '**प्रछ ज्ञीप्सायाम्**' (भ्वा०प०) धातु से '**निष्ठा**' (३।२।१०२) से भूतकाल अर्थ में 'क्त' प्रत्यय है। इस सूत्र से 'प्रच्छ्' के छकार को झलादि कित् 'त' प्रत्यय परे होने पर शकार आदेश होता है। '**ग्रहिज्या०**' (६।१।१६) से धातु को सम्प्रसारण, '**व्रश्चभ्रस्ज०**' (८।२।३६) से शकार को षकार और '**ष्टुना ष्टुः**' (८।४।४१) से तकारवर्ग को टवर्ग टकार होता है। ऐसे ही 'क्तवतु' प्रत्यय करने पर-**पृष्टवान्** ।*

*(६) पृष्ट्वा । यहां '**प्रछ ज्ञीप्सायाम्**' (भ्वा०प०) धातु से '**समानकर्तृकयोः पूर्वकाले**' (८।२।२१) से 'क्त्वा' प्रत्यय है। शेष कार्य पूर्ववत् है।*

(७) द्यूतः । दिव्+क्त । दि ऊठ्+त । दि ऊ+त । द्यूत+सु । द्यूतः ।

*यहां '**दिवु क्रीडादिषु**' (दि०प०) धातु से पूर्ववत् 'क्त' प्रत्यय है। इस सूत्र से 'दिव्' के वकार को झलादि, कित् 'त' प्रत्यय परे होने पर 'ऊठ्' आदेश होता है। '**इको यणचि**' (७।१।७६) से 'यण्' आदेश है। ऐसे ही 'क्तवतु' प्रत्यय करने पर द्यूतवान् और 'क्त्वा' प्रत्यय करने पर 'द्यूत्वा' शब्द सिद्ध होता है।*

ऊडादेशः—

(२) ज्वरत्वरस्रिव्यविमवामुपधायाश्च ।२०।

प०वि०-ज्वर-त्वर-स्रिवि-अवि-मवाम् ६।३ उपधायाः ६।१ च अव्ययपदम् ।

स०-ज्वरश्च त्वरश्च स्रिविश्च अविश्च मव् च ते- ज्वरत्वर-स्रिव्यविमवः, तेषाम्-ज्वरत्वरस्रिव्यविमवाम् (इतरेतरयोगद्वन्द्वः) ।

अनु०-अङ्गस्य, क्विझलोः, क्ङिति, वः, ऊठ् इति चानुवर्तते । 'च्छ्वोः' इत्यस्माद् 'वः' शूठ् इत्यस्माच्च ऊठ् इत्यनुवर्तनीयमर्थसम्भवात् ।

अन्वयः-ज्वरत्वरस्रिव्यविमवाम् अङ्गानां वस्य उपधायाश्च क्विझलोः क्ङिति च ऊठ् ।

अर्थ:-ज्वरत्वरस्रिव्यविमवामङ्गानां वकारस्य उपधायाश्च स्थाने क्वौ झलादौ क्ङिति, च प्रत्यये परतः ऊडादेशो भवति।

उदा०-**(ज्वरः) क्विप्**-जूः, जूरौ, जूरः। **झलादौ किति**-जूर्तिः। **(त्वरः) क्विप्**-तूः तूरौ, तूरः। **झलादौ किति**-तूर्तिः। **(स्रिविः) क्विप्**-स्रूः, स्रुवौ, स्रुवः। **झलादौ किति**-स्रूतिः। **(अविः) क्विप्**-ऊः, उवौ, उवः। **झलादौ किति**-ऊतिः। **(मवः) क्विप्**-मूः, मुवौ, मुवः। **झलादौ किति**-मूतिः।

आर्यभाषाः *अर्थ-(ज्वरत्वर०) ज्वर, त्वर, स्रिवि, अवि और मव (अङ्गस्य) अंगों के (वः) वकार और (उपधायाः) उपधा के स्थान में (च) भी (क्विझलोः) क्विप् और झलादि (क्ङिति) कित्, ङित् प्रत्यय परे होने पर (ऊठ्) ऊठ् आदेश होता है।*

उदा०-(ज्वर) क्विप्-जूः, जूरौ, जूरः। जूः=रोगी। झलादि कित्-जूर्तिः। रोगी होना। (त्वर) क्विप्-तूः तूरौ, तूरः। तूः=सम्भ्रान्त। झलादि कित्-तूर्तिः। सम्भ्रान्ति। (स्रिवि) क्विप्-स्रूः, स्रुवौ, स्रुवः। स्रू=गति/शोषण करनेवाला। झलादि कित्-स्रूतिः। गति/शोषण करना। (अवि) क्विप्-ऊः, उवौ, उवः। ऊः=रक्षा आदि करनेवाला। झलादि कित्-ऊतिः। रक्षा आदि करना। (मव) क्विप्-मूः, मुवौ, मुवः। मूः=बांधनेवाला। झलादि कित्-मूतिः। बांधना।

सिद्धि-(१) जूः। ज्वर्+क्विप्। ज् ऊठ् र्+वि। ज ऊ र्+०। जूर्+सु। जूर्+०। जूः।

यहां 'ज्वर रोगे' (भ्वा०प०) धातु से 'क्विप् च' (३।२।७६) से 'क्विप्' प्रत्यय है। इस सूत्र से 'ज्वर्' के वकार और उपधाभूत अकार को 'क्विप्' प्रत्यय परे होने पर 'ऊठ्' आदेश होता है। 'हल्ङ्याब्भ्यो दीर्घात्०' (६।१।६८) से 'सु' का लोप और 'खरवसानयोर्विसर्जनीयः' (८।३।१५) से रेफ को विसर्जनीय आदेश होता है। ऐसे ही-'ञित्वरा सम्भ्रमे' (भ्वा०आ०) धातु से-तूः, 'स्रिवु गतिशोषणयोः' (दि०प०) धातु से-स्रूः, 'अव रक्षणादिषु' (भ्वा०प०) धातु से-ऊः, 'मव बन्धने' (भ्वा०प०) धातु से-मूः।

(२) जूर्तिः। ज्वर्+क्तिन्। ज्वर्+ति। ज् ऊठ् र्+ति। जूर्+ति। जूर्ति+सु। जूर्तिः।

यहां 'ज्वर रोगे' (भ्वा०प०) धातु से 'स्त्रियां क्तिन्' (३।३।९४) से 'क्तिन्' प्रत्यय है। इस सूत्र से 'ज्वर' के वकार और उपधाभूत अकार को झलादि क्तिन् प्रत्यय परे होने पर ऊठ् आदेश होता है। ऐसे ही-'त्वर' से-तूर्तिः, स्रिवु से-स्रुतिः, अव से-ऊतिः, मव से-मूतिः।

लोपादेशः–

(३) राल्लोपः ।२१।

प०वि०–रात् ५ ।१ लोपः १ ।१ ।

अनु०–अङ्गस्य, क्विझलोः, क्ङिति, छ्वोरिति चानुवर्तते।

अन्वयः–अङ्गस्य रात् च्छ्वोः क्विझलोः क्ङिति लोपः ।

अर्थः–अङ्गावयवाद् रेफात् परयोश्छकारवकारयोः क्वौ झलादौ च क्ङिति प्रत्यये परतो लोपो भवति।

उदा०–**छकारलोपः–(मुर्छा) क्विप्**–मूः, मुरौः, मुरः । **झलादौ किति**–मूर्तः, मूर्तवान्, मूर्तिः । **(हुर्छा) क्विप्**–हूः, हुरौ, हुरः । **झलादौ किति**–हूर्णः, हूर्णवान्, हूर्तिः । **वकारलोपः–(तुर्वी) क्विप्**–तूः, तुरौ, तुरः । **झलादौ किति**–तूर्णः, तूर्णवान्, तूर्तिः । **(धुर्वी)** धूः, धुरौ, धुरः । **झलादौ किति**–धूर्णः, धूर्णवान्, धूर्तिः ।

***आर्यभाषाः** अर्थ–(अङ्गस्य) अंग के (रात्) रेफ से परे (छ्वोः) छकार और वकार का (क्विझलोः) क्विप् और झलादि (क्ङिति) कित्, ङित् प्रत्यय परे होने पर (लोपः) लोप होता है।*

*उदा०–छकारलोप–(मुर्छा) क्विप्–मूः, मुरौः, मुरः । मूः=मोह करनेवाला। झलादि **कित्–मूर्तः ।** मोह किया। **मूर्तवान् ।** मोह किया। **मूर्तिः ।** मोह करना/समुच्छ्राय=ऊंचा होना। **(हुर्छा) क्विप्–हूः, हुरौ, हुरः ।** हूः=कुटिल। **झलादि कित्–हूर्णः ।** कुटिलता की। **हूर्णवान् ।** कुटिलता की। **हूर्तिः ।** कुटिलता करना। वकारलोप–**(तुर्वी) क्विप्–तूः, तुरौ, तुरः ।** तूः=हिंसा करनेवाला। **झलादि कित्–तूर्णः ।** हिंसा की। **तूर्णवान् ।** हिंसा की। **तूर्तिः ।** हिंसा करना। **(धुर्वी) धूः, धुरौ, धुरः ।** धूः=हिंसा करनेवाला। **झलादि कित्–धूर्णः ।** हिंसा की। **धूर्णवान् ।** हिंसा की। **धूर्तिः ।** हिंसा करना।*

*सिद्धि–**मूः ।** मूर्छ्+क्विप्। मूर्+०+वि। मूर्+०। मूर्। मूः ।*

*यहां **'मुर्छा मोहसमुच्छ्राययोः'** (भ्वा०प०) धातु से **'क्विप् च'** (३ ।२ ।७६) से 'क्विप्' प्रत्यय है। इस सूत्र से 'मुर्छ्' के रेफ से परवर्ती छकार का 'क्विप्' प्रत्यय परे होने पर लोप होता है। ऐसे ही–**'हुर्छा कौटिल्ये'** (भ्वा०प०) धातु से–हूः ।*

*(२) **मूर्तः ।** मूर्छ्+क्त। मूर्०+त। मूर्त+सु। मूर्तः ।*

*यहां 'मुर्छ्' धातु से **'निष्ठा'** (३ ।२ ।१०२) से भूतकाल अर्थ में 'क्त' प्रत्यय है। इस सूत्र से 'मुर्छ्' के रेफ से परवर्ती छकार का झलादि कित् 'क्त' प्रत्यय परे होने पर*

*लोप होता है। 'न ध्याख्यापॄमूर्च्छिमदाम्' (८।२।५७) से निष्ठातकार को नकरादेश और 'आदितश्च' (८।३।७७) से इट्-आगम का प्रतिषेध है। 'हलि च' (८।२।७७) से रेफान्त की उपधा को दीर्घ होता है। ऐसे ही 'क्तवतु' प्रत्यय में-**मूर्तवान्।** ऐसे ही 'हुर्छा कौटिल्ये' (भ्वा०प०) धातु से-हूर्णः, हूर्णवान्। 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' (८।२।४२) से निष्ठा के तकार को नकार और 'रषाभ्यां णो नः समानपदे' (८।४।१) से णत्व होता है।*

*(३) **मूर्तिः।** यहां 'मुर्छ्' धातु से 'स्त्रियां क्तिन्' (३।३।९४) से 'क्तिन्' प्रत्यय है। शेष कार्य पूर्ववत् है। ऐसे ही 'हुर्छ्' धातु से-**हूर्तिः।***

*(४) **तूः।** यहां 'तुर्वी हिंसार्थः' (भ्वा०प०) धातु से पूर्ववत् 'क्विप्' प्रत्यय है। इस सूत्र से 'तुर्व्' के रेफ से परवर्ती वकार को लोप होता है। ऐसे ही-क्त, क्तवतु और क्तिन् प्रत्यय करने पर-**तूर्णः, तूर्णवान्, तूर्तिः।** 'धुर्वी हिंसार्थः' (भ्वा०प०) धातु से-**धूः, धूर्णः, धूर्णवान्, धूर्तिः।***

असिद्धवत्-प्रकरणम्

असिद्धवत्-अधिकारः–

(१) असिद्धवदत्राभात्।२२।

प०वि०-असिद्धवत् अव्ययपदम्, अत्र अव्ययपदम्, आ अव्ययपदम्, भात् ५।१।

स०-न सिद्धमिति असिद्धम्, असिद्धेन तुल्यं वर्तते इति असिद्धवत् (नञ्तत्पुषः)।

सिद्धशब्दोऽत्र निष्पन्नपर्यायः। 'आ भात्' इत्यत्राभिविधावर्थे आङ् वेदितव्यः।

अर्थः-अत्र=एकाश्रये आ भात् अर्थाद् भाधिकारपर्यन्तम्=आ अध्यायपरिसमाप्तेर्यद् वक्ष्यति तद् असिद्धवद् भवतीत्यधिकारोऽयम्।

'आभीये कार्ये कर्तव्ये जातमाभीयमसिद्धं स्यादित्यधिकारोऽयम्' इति गुरुवरपण्डितविश्वप्रियशास्त्रिणः प्राहुः।

उदा०-एधि। शाधि। आगहि। जहि।

***आर्यभाषाः** अर्थ-(अत्र) यहां एक आश्रय=निमित्त में (आ भात्) भ-अधिकार पर्यन्त अर्थात् इस अध्याय की समाप्ति तक पाणिनि मुनि जो कहेंगे वह (असिद्धवत्) असिद्ध=अनिष्पन्न के तुल्य होता है, यह अधिकार सूत्र है।*

तात्पर्य यह है कि "यहां भ-अधिकार तक के कार्य करने में किया हुआ भ-सम्बन्धी कार्य असिद्ध के समान हो जाता है" (गुरुवर पण्डित विश्वप्रिय शास्त्री)।

उदा०-एधि। तू हो। शाधि। तू शिक्षा कर। आगहि। तू आ। जहि। तू हिंसा कर (मार)।

सिद्धि-(१) एधि। अस्+लोट्। अस्+सिप्। अस्+शप्+सि। अस्+०हि। ०स्+हि। ए+हि। ए+धि। एधि।

यहां 'अस भुवि' (अदा०प०) धातु से 'लोट् च' (३।३।१६२) से लोट् प्रत्यय, 'तिप्तस्झि०' (३।४।७८) से लादेश 'सिप्', 'कर्तरि शप्' (३।१।६८) से 'शप्' विकरण-प्रत्यय और 'अदिप्रभृतिभ्यः शपः' (२।४।७२) से 'शप्' का लुक् और 'सेर्ह्यपिच्च' (३।४।८७) से 'सिप्' को 'हि' आदेश होता है। 'श्नसोरल्लोपः' (६।४।१११) से 'अस्' के अकार का लोप और 'घ्वसोरेद्धावभ्यासलोपश्च' (६।४।११९) से शेष सकार को एकार आदेश होता है। इस अवस्था में 'हुझल्भ्यो हेर्धिः' (६।४।१०१) से 'हि' को 'धि' आदेश प्राप्त नहीं होता है, अतः उक्त एकार-आदेश को असिद्ध (न हुआ) मानकर 'धि' आदेश होता है।

(२) शाधि। शास्+लोट्। शास्+सिप्। शास्+शप्+सि। शास्+०+हि। शा+हि। शा+धि। शाधि।

यहां 'शासु अनुशिष्टौ' (अदा०प०) धातु से 'लोट्' आदि कार्य पूर्ववत् है। 'शास्' के स्थान में 'शा हौ' (६।४।३५) से 'शा' आदेश होता है। इस अवस्था में 'हु झल्भ्यो हेर्धिः' (६।४।१०१) से 'हि' को 'धि' आदेश प्राप्त नहीं होता है, अतः उक्त शा-आदेश को असिद्ध मानकर 'धि' आदेश होता है।

(३) आगहि। आङ्+गम्+लोट्। आ+गम्+सिप्। आ+गम्+शप्+सि। अ+गम्+०हि। आ+ग०+हि। आगहि।

यहां आङ् उपसर्गपूर्वक 'गम्लृ गतौ' (भ्वा०प०) धातु से पूर्ववत् 'लोट्' आदि कार्य हैं। 'बहुलं छन्दसि' (२।४।७६) से 'शप्' का लुक् होता है। 'अनुदात्तोपदेशवनति-तनोत्यादीनामनुनासिकलोपो झलि क्ङिति' (६। ।३७) से 'गम्' के अनुनासिक मकार का लोप होता है, तत्पश्चात् 'अतो हेः' (६।४।१०५) से 'हि' का लोप प्राप्त होता है, अतः उक्त अनुनासिक-लोप को असिद्ध मानकर 'हि' का लुक् नहीं होता है।

(४) जहि। हन्+लोट्। हन्+सिप्। हन्+शप्+सि। हन्+०+हि। ज+हि। जहि।

यहां 'हन हिंसागत्योः' (अदा०प०) धातु से 'लोट्' आदि कार्य पूर्ववत् है। 'हन्तेर्जः' (६।४।३६) से 'हन्' के स्थान में 'ज' आदेश करने पर पूर्ववत् 'हि' का लुक् प्राप्त होता है, अतः ज-आदेश को असिद्ध मानकर 'हि' का लुक् नहीं होता है।

आदेश-प्रकरणम्

नलोपः–

(१) श्नान्नलोपः।२३।

प०वि०–श्नात् ५।१ नलोपः १।१।

स०–नस्य लोप इति नलोपः (षष्ठीतत्पुरुषः)।

अनु०–अङ्गस्य इत्यनुवर्तते।

अन्वयः–श्नाद् अङ्गस्य नलोपः।

अर्थः–श्नात्=श्नम्-प्रत्ययात् परस्य अङ्गावयवस्य नकारस्य लोपो भवति।

उदा०–अनक्ति देवदत्तः। भनक्ति यज्ञदत्तः। हिनस्ति ब्रह्मदत्तः।

आर्यभाषाः *अर्थ-(श्नात्) श्नम् प्रत्यय से परे (अङ्गस्य) अंग के अवयवभूत (नलोपः) नकार का लोप होता है।*

*उदा०-**अनक्ति देवदत्तः।** देवदत्त प्रकट करता है। **भनक्ति यज्ञदत्तः।** यज्ञदत्त तोड़ता है। **हिनस्ति ब्रह्मदत्तः।** ब्रह्मदत्त हिंसा करता है (मारता है)।*

*सिद्धि-(१) **अनक्ति।** अञ्ज्+लट्। अञ्ज्+तिप्। अश्नम् न् ज्+ति। अ न न्ज्+ति। अन०ज्+ति। अनग्+ति। अनक्+ति। अनक्ति।*

*यहां 'अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु' (रुधा०प०) धातु से **'वर्तमाने लट्'** (३।२।१२३) से 'लट्' प्रत्यय, **'तिप्तस्झि०'** (३।४।७८) से लादेश 'तिप्' और **रुधादिभ्यः श्नम्'** (३।१।७८) से 'श्नम्' विकरण-प्रत्यय होता है। प्रत्यय के 'मित्' होने से यह **'मिदचोऽन्त्यात् परः'** (१।१।४७) से 'अञ्ज्' के अन्त्य अच् अकार से परे रहता है। इस सूत्र से इस 'श्नम्' से परवर्ती नकार का लोप होता है। अञ्ज् में दृश्यमान ञकार वस्तुतः नकार है, **'स्तोः श्चुना श्चुः'** (८।४।४०) से इसे चवर्ग ञकार हो गया है। ऐसा ही सर्वत्र जानें।*

*(२) **भनक्ति।** यहां 'भञ्जो आमर्दने' (रुधा०प०) धातु से 'लट्' आदि सब कार्य पूर्ववत् है।*

*(३) **हिनस्ति।** यहां **'हिसि हिंसायाम्'** (रुधा०प०) धातु के इदित् होने से **'इदितो नुम् धातोः'** (७।१।५८) से 'नुम्' आगम होता है। इस सूत्र से 'श्नम्' से परवर्ती इस 'नुम्' के नकार का लोप होता है। शेष कार्य पूर्ववत् है।*

नलोपः–

(२) अनिदितां हल उपधायाः क्ङिति।२४।

प०वि०–अनिदिताम् ६।३ हलः ६।१ उपधायाः ६।१ क्ङिति ७।१।

स०–इकार इद् येषां ते इदितः, न इदित इति अनिदितः, तेषाम्-अनिदिताम् (बहुव्रीहिगर्भितनञ्तत्पुरुषः)। कश्च ङश्च तौ क्ङौ, क्ङावितौ यस्य स क्ङित्, तस्मिन्-क्ङिति (इतरेतरयोगद्वन्द्वगर्भितबहुव्रीहिः)।

अनु०–अङ्गस्य, नलोप इति चानुवर्तते।

अन्वयः–अनिदितां हलाम् अङ्गानाम् उपधायाः क्ङिति नलोपः।

अर्थः–अनिदितां हलन्तानाम् अङ्गानाम् उपधायाः क्ङिति प्रत्यये परतो नकारस्य लोपो भवति।

उदा०–**किति**–स्रस्तः, ध्वस्तः, स्रस्यते, ध्वस्यते। **ङिति**–सनीस्रस्यते, दनीध्वस्यते।

***आर्यभाषाः** अर्थ-(अनिदिताम्) जिनका इकार इत् नहीं है उन (हलः) हलन्त (अङ्गस्य) अंगों की (उपधायाः) उपधा के (नलोपः) नकार का लोप होता है (क्ङिति) कित् और ङित् प्रत्यय परे होने पर।*

*उदा०–**किति**–**स्रस्तः**। नीचे गिरा हुआ। **ध्वस्तः**। नीचे गिरा हुआ। **स्रस्यते**। नीचे गिरा जाता है। **ध्वस्यते**। नीचे गिरा जाता है। **ङिति**–**सनीस्रस्यते**। पुनः-पुनः नीचे गिरता है। **दनीध्वस्यते**। पुनः-पुनः नीचे गिरता है।*

*सिद्धि–(१) **स्रस्तः**। स्रंस्+क्त। स्रंस्+त। स्रस्+त। स्रस्त+सु। स्रस्तः।*

*यहां **'स्रंसु अधःपतने'** (भ्वा०आ०) से **'निष्ठा'** (३।२।१०२) से भूतकाल में 'क्त' प्रत्यय है। इस सूत्र अनिदित, हलन्त, स्रंस् अंग के उपधाभूत नकार का कित् 'क्त' प्रत्यय परे होने पर लोप होता है। ऐसे ही **'ध्वंसु अधःपतने'** धातु से–**ध्वस्तः**।*

*(२) **स्रस्यते**। स्रस्+लट्। स्रंस्+त। स्रंस्+यक्+त। स्रस्+य+ते। स्रस्यते।*

*यहां **'स्रंसु अधःपतने'** (भ्वा०आ०) से **'वर्तमाने लट्'** (३।२।१२३) से कर्मवाच्य में 'लट्' प्रत्यय और **'सार्वधातुके यक्'** (३।१।६७) से 'यक्' विकरण-प्रत्यय है। इस सूत्र से अनिदित, हलन्त 'स्रंस्' अंग के उपधाभूत नकार का कित् 'यक्' प्रत्यय परे होने पर लोप होता है। ऐसे ही **'ध्वंसु अधःपतने'** (भ्वा०आ०) धातु से–**ध्वस्यते**।*

*(३) **सनीस्रस्यते**। स्रंस्+यङ्। स्रंस्+य। स्रस्+य। स्रस्+स्रस+य। स+स्रस्+य। स नीक्+स्रस्+य। सनी+स्रस्+य। सनीस्रस्य+लट्। सनीस्रस्यते।*

यहां 'स्रंसु अधःपतने' (भ्वा०आ०) धातु से 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' (३।१।२२) से 'यङ्' प्रत्यय है। इस सूत्र से अनिदित, हलन्त 'स्रस्' अंग के उपधाभूत नकार का ङित् 'यङ्' प्रत्यय परे होने पर लोप होता है। 'नीग् वञ्चुस्रंसु-ध्वंसुभ्रंसुकसपतपदस्कन्दाम्' (८।४।८४) से अभ्यास को 'नीक्' आगम होता है।

नलोपः–

(३) दंशसञ्जस्वञ्जां शपि।२५।

प०वि०–दंश-सञ्ज-स्वञ्जाम् ६।३ शपि ७।१।

स०–दंशश्च सञ्जश्च स्वञ्ज् च ते दंशसञ्जस्वञ्जः, तेषाम्-दंशसञ्जस्वञ्जाम् (इतरेतरयोगद्वन्द्वः)।

अनु०–अङ्गस्य, उपधायाः, नलोप इति चानुवर्तते।

अन्वयः–दंशसञ्जस्वञ्जाम् अङ्गानाम् उपधायाः शपि प्रत्यये परतो नकारस्य लोपो भवति।

उदा०–(**दंशः**) दशति देवदत्तः। (**सञ्जः**) सजति यज्ञदत्तः। (**स्वञ्जः**) परिष्वजते ब्रह्मदत्तः।

आर्यभाषाः *अर्थ-(दंशसञ्जस्वञ्जाम्) दंश, सञ्ज और स्वञ्ज (अङ्गस्य) अंगों के (उपधायाः) उपधाभूत (नलोपः) नकार का लोप होता है (शपि) शप् प्रत्यय परे होने पर।*

*उदा०–(**दंश**) **दशति देवदत्तः।** देवदत्त दांतों से काटता है। (**सञ्ज**) **सजति यज्ञदत्तः।** यज्ञदत्त आलिंगन करता है। (**स्वञ्ज**) **परिष्वजते ब्रह्मदत्तः।** ब्रह्मदत्त सर्वतः आलिंगन करता है।*

*सिद्धि-(१) **दशति।** दंश्+लट्। दंश+तिप्। दंश्+शप्+ति। दंश्+अ+ति। दशति।*

*यहां **'दंश दशने'** (भ्वा०प०) धातु से 'लट्' प्रत्यय है। **'कर्तरि शप्'** (३।१।६८) से 'शप्' विकरण-प्रत्यय होता है। इस सूत्र से 'दंश्' अंग के उपधाभूत नकार का 'शप्' प्रत्यय परे होने पर लोप होता है।*

*(२) **सजति।** **'सञ्ज सङ्गे'** (भ्वा०प०) धातु से पूर्ववत्।*

*(३) **स्वजति।** **'स्वञ्ज परिष्वङ्गे'** (भ्वा०आ०) धातु से पूर्ववत्।*

नलोपः–

(४) रञ्जेश्च।२६।

प०वि०–रञ्जेः ६।१ च अव्ययपदम्।

अनु०–अङ्गस्य, उपधायाः, नलोपः, शपि इति चानुवर्तते।

अन्वयः-रञ्जेरङ्गस्य च उपधायाः शपि नलोपः।

अर्थः-रञ्जेरङ्गस्य चोपधायाः शपि प्रत्यये परतो नकारस्य लोपो भवति।

उदा०-रजति, रजतः, रजन्ति।

आर्यभाषा *अर्थ-(रञ्जेः) रञ्ज् (अङ्गस्य) अंग के (उपधायाः) उपधाभूत (नलोपः) नकार का लोप होता है (शपि) शप् प्रत्यय परे होने पर।*

*उदा०-**रजति**। वह रंगता है। **रजतः**। वे दोनों रंगते हैं। **रजन्ति**। वे सब रंगते हैं।*

*सिद्धि-**रजति**। रञ्ज्+लट्। रञ्ज्+तिप्। रञ्ज्+शप्+ति। रज्+अ+ति। रजति।*

*यहां 'रञ्ज रागे' (भ्वा०प०) धातु से 'लट्' प्रत्यय है। इस सूत्र से 'रञ्ज्' अंग के उपधाभूत नकार का 'शप्' प्रत्यय परे होने पर लोप होता है। ऐसे ही-**रजतः**, **रजन्ति**।*

नलोपः-

(५) घञि च भावकरणयोः।२७।

प०वि०-घञि ७।१ च अव्ययपदम्, भावकरणयोः ७।२।

स०-भावश्च करणं च ते भावकरणे, तयोः-भावकरणयोः (इतरेतरयोगद्वन्द्वः)।

अनु०-अङ्गस्य, उपधायाः, नलोपः, रञ्जेरिति चानुवर्तते।

अन्वयः-रञ्जेरङ्गस्य उपधाया भावकरणयोर्घञि च नलोपः।

अर्थः-रञ्जेरङ्गस्य उपधाया भावकरणवाचिनि घञि प्रत्यये च परतो नकारस्य लोपो भवति।

उदा०-**भावे**-आश्चर्यो रागः। विचित्रो रागः। **करणे**-रज्यतेऽनेनेति रागः।

आर्यभाषा *अर्थ-(रञ्जेः) रञ्ज् (अङ्गस्य) अंग के (उपधायाः) उपधाभूत (नलोपः) नकार का लोप होता है (भावकरणयोः) भाववाची और करणवाची (घञि) घञ् प्रत्यय परे होने पर (च) भी।*

*उदा०-भाव-**आश्चर्यो रागः**। क्या अद्भुत रंगाई है। **विचित्रो रागः**। क्या विचित्र रंगाई है (रंगणा)। करण-**रागः**। जिससे वस्त्र आदि रंगा जाता है वह लोहित आदि रंग (द्रव्य)।*

सिद्धि-(१) रागः। रञ्ज्+घञ्। रञ्ज्+अ। रज्+अ। राज्+अ। राग्+अ। राग+सु। रागः।

यहां 'रञ्ज रागे' (दि०उ०) धातु से 'भावे' (३।३।१८) से भाव अर्थ में 'घञ्' प्रत्यय है। इस सूत्र से 'रञ्ज्' अंग के उपधाभूत नकार का भाववाची 'घञ्' प्रत्यय परे होने पर लोप होता है। 'चजोः कु घिण्यतोः' (७।३।५२) से जकार को कुत्व गकार और 'अत उपधायाः' (७।२।११६) से उपधावृद्धि होती है।

(२) रागः। यहां 'रञ्ज रागे' (दि०उ०) धातु से 'हलश्च' (३।३।१२१) से करण-कारक में 'घञ्' प्रत्यय है। शेष कार्य पूर्ववत् है।

निपातनम्–

(६) स्यदो जवे।२८।

प०वि०–स्यदः १।१ जवे ७।१।

अनु०–उपधायाः, नलोपः, घञि इति चानुवर्तते।

अन्वयः–जवे स्यदो घञि उपधाया नलोपः।

अर्थः–जवेऽर्थे स्यद इत्यत्र घञि परत उपधाया नकारस्य लोपो वृद्ध्यभावश्च निपात्यते।

उदा०–गवां स्यद इति गोस्यदः। अश्वस्यदः। गवाम् अश्वानां च गतिविषयको वेग इत्यर्थः।

आर्यभाषाः *अर्थ-(जवे) वेग अर्थ में (स्यदः) स्यद इस पद में (घञि) घञ् प्रत्यय परे होने पर (उपधायाः) उपधाभूत (नलोपः) नकार का लोप और वृद्धि का अभाव निपातित है।*

*उदा०-**गोस्यदः**। गौओं का गतिविषयक वेग। **अश्वस्यदः**। घोड़ों का गति-विषयक वेग।*

सिद्धि-स्यदः। स्यन्द्+घञ्। स्यन्द्+अ। स्यद्+अ। स्यदः। गो+स्यदः=गोस्यदः।

*यहां 'स्यन्दू प्रस्रवणे' (भ्वा०आ०) धातु से 'भावे' (३।३।१८) से भाव अर्थ में 'घञ्' प्रत्यय है। निपातन से उपधाभूत नकार का लोप और 'अत उपधायाः' (७।२।११६) से प्राप्त उपधावृद्धि का अभाव है। ऐसे ही-**अश्वस्यदः**।*

निपातनम्–

(७) अवोदैधोद्मप्रश्रथहिमश्रथाः।२९।

प०वि०–अवोद-एध-ओद्म-प्रश्रथ, हिमश्रथाः १।३।

स०-अवोदश्च एधश्च ओद्मश्च प्रश्रथश्च हिमश्रथश्च ते अवोदैधोद्मप्रश्रथहिमश्रथाः (इतरेतरयोगद्वन्द्वः)।

अनु०-उपधायाः, नलोप इति चानुवर्तते।

अन्वयः-अवोदैधोद्मप्रश्रथहिमश्रथेषु उपधाया नलोपः।

अर्थः-अवोदैधोद्मप्रश्रथहिमश्रथेषु शब्देषु उपधाया नकारस्य लोपो निपात्यते।

उदा०-अवोदः। एधः। ओद्मः। प्रश्रथः। हिमश्रथः।

आर्यभाषाः *अर्थ-(अवोद०) अवोद, एध, ओद्म, प्रश्रथ और हिमश्रथ इन शब्दों में (उपधायाः) उपधा के (नलोपः) नकार का लोप निपातित है।*

*उदा०-**अवोदः**। कम गीला करना। **एधः**। इंधन। **ओद्मः**। गीला करनेवाला। **प्रश्रथः**। अति शिथिल होना। **हिमश्रथः**। हिम (बर्फ) का पिघलना।*

*सिद्धि-(१) **अवोदः**। अव+उन्द्+घञ्। अव+उन्द्+अ। अव+उद्+अ। अवोद+सु। अवोदः।*

*यहां अव-उपसर्गपूर्वक **'उन्दी क्लेदने'** (रु०प०) धातु से **'भावे'** (३।३।१८) से भाव अर्थ में 'घञ्' प्रत्यय है। इस सूत्र से 'उन्द्' के उपधाभूत नकार का 'घञ्' प्रत्यय परे होने पर लोप निपातित है।*

*(२) **एधः**। इन्ध्+घञ्। इन्ध्+अ। इध्+अ। एध्+अ। एध+सु। एधः।*

*यहां **'ञिइन्धी दीप्तौ'** (रुधा०आ०) धातु से **'अकर्तरि च कारके संज्ञायाम्'** (३।३।१९) से 'घञ्' प्रत्यय है। इस सूत्र से 'इन्ध्' के उपधाभूत नकार का 'घञ्' प्रत्यय परे होने पर लोप और **'पुगन्तलघूपधस्य च'** (८।३।८६) से गुण भी निपातित है। **'न धातुलोप आर्धधातुके'** (१।१।४) से प्राप्त गुण का प्रतिषेध नहीं होता है।*

*(३) **ओद्मः**। उन्द्+मन्। उन्द्+म। उद्+म। ओद्+म। ओद्+म। ओद्म+सु। ओद्मः।*

*यहां **'उन्दी क्लेदने'** (रुधा०प०) धातु से औणादिक 'मन्' प्रत्यय है। **'अर्तिस्तु०'** (उणा० १।१४०) से विहित 'मन्' प्रत्यय, बहुलवचन से 'उन्दी' धातु से भी होता है। इस सूत्र से उन्द् धातु के उपधाभूत नकार का लोप और पूर्ववत् गुणभाव निपातित है।*

*(४) **प्रश्रथः**। प्र+श्रन्थ्+घञ्। प्र+श्रन्थ्+अ। प्र+श्रथ्+अ। प्रश्रथ+सु। प्रश्रथः।*

*यहां प्र-उपसर्गपूर्वक **'श्रन्थ मोचनप्रतिहर्षणयोः, सन्दर्भे च'** (क्र्या०प०) धातु से पूर्ववत् 'घञ्' प्रत्यय है। इस सूत्र से 'श्रन्थ्' के उपधाभूत नकार का 'घञ्' प्रत्यय परे होने पर लोप और **'अत उपधायाः'** (७।२।११६) से प्राप्त वृद्धि का अभाव निपातित है। ऐसे ही 'हिम' उपपद होने पर-**हिमश्रथः**।*

नलोप-प्रतिषेधः--

(८) नाञ्चेः पूजायाम्।३०।

प०वि०-न अव्ययपदम्, अञ्चेः ६।१ पूजायाम् ७।१।

अनु०-अङ्गस्य, उपधायाः, नलोप इति चानुवर्तते।

अन्वयः-पूजायाम् अञ्चेरङ्गस्य उपधाया नलोपो न।

अर्थः-पूजायामर्थे वर्तमानस्य अञ्चतेरङ्गस्य उपधाया नकारस्य लोपो न भवति।

उदा०-अञ्चिता अस्य गुरवः। अञ्चितमिव शिरो वहति।

आर्यभाषाः *अर्थ-(पूजायाम्) पूजा अर्थ में विद्यमान (अञ्चेः) अञ्चि (अङ्गस्य) अंग के (उपधायाः) उपधाभूत (नलोपः) नकार का लोप (न) नहीं होता है।*

*उदा०-**अञ्चिता अस्य गुरवः।** यह गुरुजनों का पूजक है। **अञ्चितमिव शिरो वहति।** वह पूजित के तुल्य शिर को धारण करता है।*

*सिद्धि-**अञ्चिताः।** अञ्च्+क्त। अञ्च्+त। अञ्च्+इट्+त। अञ्च्+इ+त। अञ्चित+जस्। अञ्चिताः।*

*यहां **'अञ्चु गतिपूजनयोः'** (भ्वा०प०) धातु से पूजा अर्थ में **'मतिबुद्धिपूजार्थेभ्यश्च'** (३।२।१८८) से वर्तमानकाल में 'क्त' प्रत्यय है और **'अञ्चेः पूजायाम्'** (७।२।५३) से 'इट्' आगम होता है। इस सूत्र से पूजा अर्थ में 'अञ्चि' अंग के उपधाभूत नकार का लोप नहीं होता है। **'अनिदितां हल उपधायाः क्ङिति'** (६।४।२४) से नकार का लोप प्राप्त था, उसका प्रतिषेध किया गया है।*

*'**अञ्चिता अस्य गुरवः**' यहां '**क्तस्य च वर्तमाने**' (२।३।६७) से कर्ता कारक में षष्ठीविभक्ति है।*

नलोप-प्रतिषेधः--

(९) क्त्वि स्कन्दिस्यन्दोः।३१।

प०वि०-क्त्वि ७।१ स्कन्दि-स्यन्दोः ७।२।

स०-स्कन्दिश्च स्यन्द् च तौ स्कन्दिस्यन्दौ, तयोः-स्कन्दिस्यन्दोः (इतरेतरयोगद्वन्द्वः)।

अनु०-अङ्गस्य, उपधायाः, नलोपः, न इति चानुवर्तते।

अन्वयः-स्कन्दिस्यन्दोरङ्गयोः क्त्वि उपधाया नलोपो न।

अर्थः-स्कन्दिस्यन्दोरङ्गयोः क्त्वा प्रत्यये परतो नकारस्य लोपो न भवति।

उदा०-(**स्कन्दिः**) स्कन्त्वा। (**स्यन्दः**) स्यन्त्वा, स्यन्दित्वा।

आर्यभाषाः *अर्थ-(स्कन्दिस्यन्दोः) स्कन्दि और स्यन्द (अङ्गस्य) अंगों के (उपधायाः) उपधाभूत (नलोपः) नकार का लोप (न) नहीं होता है (क्त्वि) क्त्वा प्रत्यय परे होने पर।*

*उदा०-(स्कन्दि) **स्कन्त्वा**। गति करके/सूखकर। (स्यन्द) **स्यन्त्वा, स्यन्दित्वा**। बहकर।*

*सिद्धि-(१) **स्कन्त्वा**। स्कन्द्+क्त्वा। स्कन्द्+त्वा। स्कन्त्+त्वा। स्कन्०+त्वा। स्कन्त्वा।*

*यहां **'स्कन्दिर् गतिशोषणयोः'** (भ्वा०आ०) धातु से **'समानकर्तृकयोः पूर्वकाले'** (३।४।२१) से 'क्त्वा' प्रत्यय है। इस सूत्र से 'स्कन्द्' के उपधाभूत नकार का 'क्त्वा' प्रत्यय परे होने पर लोप नहीं होता है। **'अनिदितां हल उपधायाः क्ङिति'** (६।४।२४) से नकार का लोप प्राप्त था, उसका प्रतिषेध किया गया है। **'खरि च'** (८।४।५४) से दकार को चर् तकार आदेश और **'झरो झरि सवर्णे'** (६।४।६४) से पूर्ववर्ती तकार का लोप होता है।*

*ऐसे ही **'स्यन्दू प्रस्रवणे'** (भ्वा०आ०) धातु से-**स्यन्त्वा**। इस धातु के उदित् होने से **'स्वरतिसूतिसूयतिधूञूदितो वा'** (७।२।४४) से विकल्प से 'इट्' आगम होता है-**स्यन्दित्वा**। इट्-पक्ष में **'न क्त्वा सेट्'** (१।२।१८) से 'क्त्वा' प्रत्यय के कित् न होने से धातु के उपधाभूत नकार-लोप की प्राप्ति नहीं होती है।*

नलोप-विकल्पः--

(१०) जान्तनशां विभाषा।३२।

प०वि०-जान्त-नशाम् ६।३ विभाषा १।१।

स०-जोऽन्ते येषां ते जान्ताः, जान्ताश्च नश् च ते जान्तनशः, तेषाम्-जान्तनशाम् (बहुव्रीहिगर्भित इतरेतरयोगद्वन्द्वः)।

अनु०-अङ्गस्य, उपधायाः, नलोपः, न, क्त्वि इति चानुवर्तते।

अन्वयः-जान्तनशामङ्गानां क्त्वि उपधाया विभाषा नलोपो न।

अर्थः-जकारान्तानां नशेश्चाङ्गस्य क्त्वा प्रत्यये परत उपधाया विकल्पेन नलोपो न भवति।

उदा०-(**जान्तः**) **रञ्ज्**-रङ्क्त्वा, रक्त्वा। **भञ्ज्**-भङ्क्त्वा, भक्त्वा। (**नश्**) नंष्ट्वा, नष्ट्वा, इट्पक्षे-नशित्वा।

आर्यभाषाः *अर्थ-(जान्तनशाम्) जकारान्त और नश् (अङ्गस्य) अंग के (उपधायाः) उपधाभूत (नलोपः) नकार का लोप (विभाषा) विकल्प से (न) नहीं होता है।*

*उदा०-(जान्त) **रञ्ज्-रङ्क्त्वा, रक्त्वा।** रंगकर। **भञ्ज्-भङ्क्त्वा, भक्त्वा।** तोड़कर। (नश्) **नंष्ट्वा, नष्ट्वा,** इट्-पक्ष में-**नशित्वा।** अदृष्ट होकर।*

*सिद्धि-(१) **रङ्क्त्वा।** रञ्ज्+क्त्वा। रञ्ज्+त्वा। रङ्ग्+त्वा। रङ्क्+त्वा। रङ्क्त्वा।*

*यहां 'रञ्ज रागे' (भ्वा०प०) धातु से **'समानकर्तृकयोः पूर्वकाले'** (३।२।२१) से 'क्त्वा' प्रत्यय है। इस सूत्र से जकारान्त 'रञ्ज्' अंग के उपधाभूत नकार का लोप नहीं होता है। **'अनिदितां हल उपधायाः क्ङिति'** (६।४।२४) से नकार का लोप प्राप्त था, उसका प्रतिषेध किया गया है। **'चोः कुः'** (८।२।३०) से जकार को कवर्ग गकार और **'खरि च'** (८।४।५४) से गकार को चर् ककार होता है। विकल्प-पक्ष में नकार का लोप है-**रक्त्वा।***

*(२) **नंष्ट्वा।** नश्+क्त्वा। नश्+त्वा। न नुम् श्+त्वा। न न् श्+त्वा। न श्+त्वा। न ष्+ट्त्वा। नंष्ट्त्वा।*

*यहां **'णश अदर्शने'** (दि०प०) धातु से पूर्ववत् 'क्त्वा' प्रत्यय है। **'मस्जिनशोर्झलि'** (७।१।६०) से 'नश्' को 'नुम्' आगम होता है। इस सूत्र से 'नंश्' के उपधाभूत नकार का लोप नहीं होता है। पूर्वोक्त प्राप्ति का इस सूत्र से प्रतिषेध किया गया है। **'नश्चापदान्तस्य झलि'** (१।१।४४) से नकार को अनुस्वार होता है। **'व्रश्चभ्रस्ज०'** (७।२।३६) से शकार को षकार और **'ष्टुना ष्टुः'** (८।४।४१) से तकार को टकार होता है। विकल्प-पक्ष में नकार का लोप है-**नष्ट्त्वा।** 'नशित्वा' यहां **'रधादिभ्यश्च'** (७।२।४५) से विकल्प से इट् आगम होता है।*

विशेषः *'**रङ्क्त्वा**' आदि में **'अनिदितां हल उपधायाः क्ङिति'** (६।४।२४) से नकार लोप प्राप्त था, अतः यह प्राप्त विभाषा है। **'नवेति विभाषा'** (१।१।४४) से निषेध और विकल्प की विभाषा-संज्ञा की गई है, अतः इस प्राप्त विभाषा-सूत्र में नकार से प्राप्त का प्रतिषेध होकर 'वा' से विकल्प होता है। **'विभाषा न भवति'** का यही अभिप्राय है।*

नलोप-विकल्पः-

(११) भञ्जेश्च चिणि।३३।

प०वि०-भञ्जेः ६।१ च अव्ययपदम्, चिणि ७।१।

अनु०-अङ्गस्य, उपधायाः, नलोपः, विभाषा इति चानुवर्तते।

अन्वयः-भञ्जेश्चाङ्गस्य चिणि उपधाया विभाषा नलोपः।

अर्थः-भञ्जेरङ्गस्य चिणि परत उपधाया विकल्पेन नकारस्य लोपो भवति।

उदा०-अभाजि देवदत्तेन। अभञ्जि देवदत्तेन।

आर्यभाषाः *अर्थ-(भञ्जेः) भञ्ज् (अङ्गस्य) अंग के (उपधायाः) उपधाभूत (नलोपः) नकार का लोप (विभाषा) विकल्प से होता है (चिणि) चिण् प्रत्यय परे होने पर।*

*उदा०-**अभाजि देवदत्तेन। अभञ्जि देवदत्तेन।** देवदत्त के द्वारा तोड़ा गया।*

सिद्धि-अभाजि। *भञ्ज्+लुङ्। अट्+भञ्ज्+च्लि+ल्। अ+भञ्ज्+चिण्+त। अ+भज्+इ+०। अ+भाज्+इ। अभाजि।*

*यहां **'भञ्जो आमर्दने'** (रुधा०प०) धातु से 'लुङ्' (३।२।११०) से भूतकाल में 'लुङ्' प्रत्यय और **'चिण् भावकर्मणोः'** (३।१।६६) से कर्म-अर्थ में 'च्लि' के स्थान में 'चिण्' आदेश है। इस सूत्र से 'भञ्ज्' अंग के उपधाभूत नकार का 'चिण्' परे होने पर लोप होता है। तत्पश्चात् **'अत उपधायाः'** (७।२।११६) से उपधावृद्धि होती है। विकल्प-पक्ष में नकार का लोप नहीं है-**अभञ्जि।***

इकार-आदेशः-

(१२) शास इदङ्हलोः।३४।

प०वि०-शासः ६।१ इत् १।१ अङ्हलोः ७।२।

स०-अङ् च हल् च तौ-अङ्हलौ, तयोः-अङ्हलोः (इतरेतर-योगद्वन्द्वः)।

अनु०-अङ्गस्य, उपधाया इति चानुवर्तते। 'क्ङिति' इति चात्र मण्डूकप्लुतगत्याऽनुवर्तनीयम्।

अन्वयः-शासोऽङ्गस्य उपधाया अङ्हलोः क्ङिति इत्।

अर्थः-शासोऽङ्गस्य उपधाया अङि हलादौ च क्ङिति प्रत्यये परत इकारादेशो भवति।

उदा०-अङि-अन्वशिषत्, अन्वशिषताम्, अन्वशिषन्। **हलादौ किति**-शिष्टः, शिष्टवान्। **हलादौ ङिति**-आवां शिष्वः। वयं शिष्मः।

आर्यभाषाः *अर्थ-(शासः) शास् (अङ्गस्य) अङ्ग की (उपधायाः) उपधा को (इत्) इकार आदेश होता है (अङ्हलोः) अङ् और हलादि (क्ङिति) कित्, ङित् प्रत्यय परे होने पर।*

*उदा०-अङि-**अन्वशिषत्।** उसने आज्ञा की। **अन्वशिषताम्।** उन दोनों ने आज्ञा की। **अन्वशिषन्।** उन सबने आज्ञा की। हलादि कित्-**शिष्टः।** आज्ञा की। **शिष्टवान्।** आज्ञा की। हलादि ङित्-**आवां शिष्वः।** हम दोनों आज्ञा करते हैं। **वयं शिष्मः।** हम सब आज्ञा करते हैं।*

*सिद्धि-(१) **अन्वशिषत्।** अनु+शास्+लुङ्। अनु+अट्+शास्+च्लि+ल्। अनु+अ+शास्+अङ्+तिप्। अनु+अ+शिष्+अ+त्। अन्वशिषत्।*

*यहां अनु-उपसर्गपूर्वक '**शासु अनुशिष्टौ**' (अदा०प०) धातु से '**लुङ्**' (३।२।११०) से भूतकाल में 'लुङ्' प्रत्यय है। '**सर्तिशास्त्यर्तिभ्यश्च**' (३।१।५६) से 'च्लि' के स्थान में 'अङ्' आदेश होता है। इस सूत्र 'शास्' के उपधाभूत आकार को 'अङ्' प्रत्यय परे होने पर इकार आदेश होता है। तत्पश्चात् '**शासिवसिघसीनां च**' (८।३।६०) से षत्व होता है।*

*(२) **शिष्टः।** शास्+क्त। शास्+त। शिष्+ट। शिष्ट+सु। शिष्टः।*

*यहां पूर्वोक्त 'शास्' धातु से '**निष्ठा**' (३।२।१०२) से भूतकाल में 'क्त' प्रत्यय है। इस सूत्र से 'शास्' अंग के उपधाभूत आकार को हलादि कित् 'क्त' प्रत्यय परे होने पर इकार आदेश होता है। पूर्ववत् षत्व और '**ष्टुना ष्टुः**' (८।४।४१) से तकार को टकार होता है। ऐसे ही 'क्तवतु' प्रत्यय में **शिष्टवान्।***

*(३) **शिष्वः।** शास्+लट्। शास्+वस्। शास्+शप्+वस्। शास्+०+वस्। शिष्+वस्। शिष्वस्। शिष्वरु। शिष्वंर्। शिष्वः।*

*यहां पूर्वोक्त 'शास्' धातु से '**वर्तमाने लट्**' (३।२।१२३) से 'लट्' प्रत्यय, '**तिप्तस्झि०**' (३।४।७८) से लादेश 'वस्', '**कर्तरि शप्**' (३।१।६८) से 'शप्' विकरण-प्रत्यय और '**अदिप्रभृतिभ्यः शपः**' (२।४।७२) से 'शप्' का लुक् होता है। इस सूत्र से 'शास्' अंग के उपधाभूत आकार को हलादि ङित् 'वस्' प्रत्यय परे होने पर आकार आदेश होता है। '**सार्वधातुकमपित्**' (१।२।४) से 'वस्' प्रत्यय ङिद्वत् है। ऐसे ही 'मस्' प्रत्यय में-**शिष्मः।***

शा-आदेशः–

(१३) शा हौ।३५।

प०वि०-शाः १।१ हौ ७।१।

अनु०-अङ्गस्य, शास इति चानुवर्तते।

अन्वयः-शासोऽङ्गस्य हौ शाः।

अर्थः-शासोऽङ्गस्य स्थाने हौ परतः शा-आदेशो भवति।

उदा०-अनुशाधि गुरुवर ! प्रशाधि राजन् !

आर्यभाषाः *अर्थ-(शासः) शास् (अङ्गस्य) अंग के स्थान में (हौ) हि प्रत्यय परे होने पर (शाः) शा-आदेश होता है।*

*उदा०-**अनुशाधि गुरुवर !** हे गुरुवर ! आज्ञा करो। **प्रशाधि राजन् !** हे राजन् ! प्रशासन करो।*

सिद्धि-अनुशाधि। *अनु+शास्+लोट्। अनु+शास्+सिप्। अनु+शास्+शप्+सि। अनु+शास्+०+हि। अनु+शा+हि। अनु+शा+धि। अनुशाधि।*

*यहां अनु-उपसर्गपूर्वक **'शासु अनुशिष्टौ'** (अदा०प०) धातु से **'लोट् च'** (३।३।१६२) से विधि-आदि अर्थों में 'लोट्' प्रत्यय है। **'तिप्तस्झि०'** (३।४।७८) से लादेश 'सिप्', **'कर्तरि शप्'** (३।१।६८) से 'शप्' विकरण-प्रत्यय और **'अदिप्रभृतिभ्यः शपः'** (२।४।७२) से 'शप्' का लुक् होता है। **'सेर्ह्यपिच्च'** (३।४।८७) से 'सिप्' के स्थान में 'हि' आदेश होता है। इस सूत्र से 'शास्' अंग को 'हि' परे होने पर शा-आदेश होता है। **'असिद्धवदत्राभात्'** (३।४।२२) से इसे असिद्ध मानकर **'हुझल्भ्यो हेर्धिः'** (६।४।१०१) से 'हि' को 'धि' आदेश होता है। ऐसे ही-**प्रशाधि।***

ज-आदेशः-

(१४) हन्तेर्जः।३६।

प०वि०-हन्तेः ६।१ जः १।१।

अनु०-अङ्गस्य, हाविति चानुवर्तते।

अन्वयः-हन्तेरङ्गस्य हौ जः।

अर्थः-हन्तेरङ्गस्य स्थाने हौ परतो ज-आदेशो भवति।

उदा०-वीर ! शत्रून् जहि।

आर्यभाषाः *अर्थ-(हन्तेः) हन् (अङ्गस्य) अंग के स्थान में (हौ) हि प्रत्यय परे होने पर (जः) ज-आदेश होता है।*

*उदा०-**वीर ! शत्रून् जहि।** हे वीर ! शत्रुओं का वध करो।*

सिद्धि-जहि। *हन्+लोट्। हन्+सिप्। हन्+शप्+सि। हन्+०+सि। हन्+हि। ज+हि। जहि।*

*यहां **'हन हिंसागत्योः'** (अदा०प०) धातु से **'लोट् च'** (३।३।१६२) से विधि-आदि अर्थों में लोट् प्रत्यय, **'तिप्तस्झि०'** (३।४।७८) से लादेश 'सिप्', **'कर्तरि शप्'***

(३।४।७८) से 'शप्' विकरण-प्रत्यय और 'अदिप्रभृतिभ्यः शपः' (३।४।७२) से 'शप्' का लुक् होता है। 'सेर्ह्यपिच्च' (३।४।८७) से 'सिप्' के स्थान में 'हि' आदेश होता है। इस सूत्र से 'हन्' अंग को 'हि' प्रत्यय परे होने पर ज-आदेश होता है। 'असिद्धवदत्राभात्' (३।४।२२) से ज-आदेश को असिद्ध मानकर 'अतो हेः' (६।४।१०५) से 'हि' का लुक् नहीं होता है।

अनुनासिकलोपप्रकरणम्

अनुनासिक-लोपः–

(१) अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति।३७।

प०वि०-अनुदात्तोपदेश-वनति-तनोत्यादीनाम् ६।३ अनुनासिक-लोपः १।१ झलि ७।१ क्ङिति ७।१।

स०-अनुदात्ताश्च ते उपदेशा इति अनुदात्तोपदेशाः। उपदिश्यमानावस्थायाम् अनुदात्ता इत्यर्थः। तनोतिरादिर्येषां ते तनोत्यादयः। अनुदात्तोपदेशाश्च वनतिश्च तनोत्यादयश्च ते-अनुदात्तोपदेशवनतितनोत्यादयः, तेषाम्-अनुदात्तोपदेशवनतितनोत्यादीनाम् (कर्मधारयबहुव्रीहिगर्भित इतरेतर-योगद्वन्द्वः)। अनुनासिकस्य लोप इति अनुनासिकलोपः (षष्ठीतत्पुरुषः)। कश्च ङश्च तौ क्ङौ, क्ङावितौ यस्य स क्ङित्, तस्मिन्-क्ङिति (इतरेतरयोगद्वन्द्वगर्भितबहुव्रीहिः)।

अनु०-अङ्गस्य इत्यनुवर्तते।

अन्वयः-अनुदात्तोपदेशवनतितनोत्यादीनाम् अङ्गानाम् अनुनासिकलोपो झलि क्ङिति।

अर्थः-अनुदात्तोपदेशानाम्, वनतेः, तनोत्यादीनां चाङ्गानाम् अनुनासिकस्य लोपो भवति, झलादौ क्ङिति प्रत्यये परतः।

उदा०-**(अनुदात्तोपदेशाः) रम्**-रत्वा, रतः, रतवान्, रतिः। अनुदात्तोपदेशा अनुनासिकान्ता यमिरमिनमिगमिहनिमन्यतयो वर्तन्ते। **(वनतिः)** वतिः। **(तनोत्यादयः) तनु**-ततः, ततवान्। **क्षणु**-क्षतः, क्षतवान्। **ऋणु**-ऋतः, ऋतवान्। **तृणु**-तृतः, तृतवान्। **घृणु**-घृतः, घृतवान्। **वनु**-वतः, वतवान्। **मनु**-मतः, मतवान्, **ङिति**-अतत, अतथाः।

आर्यभाषाः अर्थ-(अनुदात्तोपदेश०) उपदिश्यमान अवस्था में अनुदात्त, वनति और तनोति आदि (अङ्गस्य) अंगों के (अनुनासिकलोपः) अनुनासिक का लोप होता है (झलि) झलादि (क्ङिति) कित् और ङित् प्रत्यय परे होने पर।

उदा०-(अनुदात्तोपदेश) **रम्-रत्वा।** खेलकर। **रतः।** खेला। **रतवान्।** खेला। **रतिः।** खेलना। **(वनति) वतिः।** सेवा करना। **(तनोत्यादि) तनु-ततः।** विस्तार किया। **ततवान्।** विस्तार किया। **क्षणु-क्षतः।** हिंसा की। **क्षतवान्।** हिंसा की। **ऋणु-ऋतः।** गया। **ऋतवान्।** गया। **तृणु-तृतः।** दान किया। **तृतवान्।** दान किया। **घृणु-घृतः।** चमका। **घृतवान्।** चमका। **वनु-वतः।** याचना की। **वतवान्।** याचना की। **मनु-मतः।** समझा। **मतवान्।** समझा। **ङिति-अतत। अतथाः।**

सिद्धि-(१) **रत्वा।** रम्+क्त्वा। रम्+त्वा। र०+त्वा। रत्वा+सु। रत्वा।

यहां **'रमु क्रीडायाम्'** (भ्वा०आ०) धातु से **'समानकर्तृकयोः पूर्वकाले'** (३।४।२१) से 'क्त्वा' प्रत्यय है। इस सूत्र से अनुदात्तोपदेश (अनिट्) रम् धातु के अनुनासिक (म्) का झलादि 'क्त्वा' प्रत्यय परे होने पर लोप होता है।

(२) **रतः।** रम्+क्त। रम्+त। र०+त। रत+सु। रतः।

यहां पूर्वोक्त 'रम्' धातु से **'निष्ठा'** (३।२।१०२) से भूतकाल में 'क्त' प्रत्यय है। इस सूत्र से इस धतु के अनुनासिक का झलादि 'क्त' प्रत्यय परे होने पर लोप होता है। ऐसे ही क्तवतु में-**रतवान्।**

(३) **रतिः।** रम्+क्तिन्। रम्+ति। र०+ति। रति+सु। रतिः।

यहां पूर्वोक्त 'रम्' धातु से **'स्त्रियां क्तिन्'** (३।३।९४) से 'क्तिन्' प्रत्यय है। अनुनासिक-लोप कार्य पूर्ववत् है।

(४) **वतिः।** वन्+क्तिन्। वन्+ति। व०+ति। वति+सु। वतिः।

यहां **'वन सम्भक्तौ'** (भ्वा०प०) धातु से **'स्त्रियां क्तिन्'** (३।३।९४) से 'क्तिन्' प्रत्यय है। यहां 'क्तिच्' प्रत्यय नहीं है क्योंकि 'क्तिच्' प्रत्यय में तो **'न क्तिचि दीर्घश्च'** (६।४।३९) से अनुनासिक-लोप का प्रतिषेध है।

(५) **ततः।** **'तनु विस्तारे'** (त०उ०)।

(६) **क्षतः।** **'क्षणु हिंसायाम्'** (त०उ०)।

(७) **ऋतः।** **'ऋणु गतौ'** (त०उ०)।

(८) **वतः।** **'वनु याचने'** (त०आ०)।

(९) **मतः।** **'मनु अवबोधने'** (त०आ०)।

(१०) **अतत।** तनू+लुङ्। अट्+तन्+च्लि+ल्। अ+तन्+सिच्+त। अ+त+०त। अतत।

यहां 'तनु विस्तारे' (त०उ०) धातु से 'लुङ्' (३।२।११०) से भूतकाल में 'लुङ्' प्रत्यय, 'च्लि लुङि' (३।१।४३) से 'च्लि' प्रत्यय और 'च्लेः सिच्' (३।१।४४) से 'च्लि' के स्थान में 'सिच्' आदेश होता है। 'तनादिभ्यस्तथासोः' (२।४।७९) से 'सिच्' का लुक् हो जाता है। इस सूत्र से 'तन्' अंग के अनुनासिक नकार का झलादि ङित् 'त' प्रत्यय परे होने पर लोप होता है। 'सार्वधातुकमपित्' (१।२।४) से सार्वधातुक 'त' प्रत्यय ङिद्वत् है। 'थास्' प्रत्यय में-अतथाः।

अनुनासिकलोप-विकल्पः–

(२) वा ल्यपि।३८।

प०वि०-वा अव्ययपदम्, ल्यपि ७।१।

अनु०-अङ्गस्य, अनुदात्तोपदेशवनतितनोत्यादीनाम्, अनुनासिकलोप इति चानुवर्तते।

अन्वयः-अनुदात्तोपदेशवनतितनोत्यादीनाम् अङ्गानां वाऽनुनासिकलोपो ल्यपि।

अर्थः-अनुदात्तोपदेशानाम्, वनतेः, तनोत्यादीनां चाङ्गानां अनुनासिकस्य विकल्पेन लोपो भवति, ल्यपि प्रत्यये परतः।

व्यवस्थितविभाषा चेयम्। मकारान्तानां विकल्पो भवति, अन्यत्र तु नित्यमेव लोपो जायते।

उदा०-**(अनुदात्तोपदेशः) यम्**-प्रयत्य, प्रयम्य। **रम्**-प्ररत्य, प्ररम्य। **नम्**-प्रणत्य, प्रणम्य। **गम्**-आगत्य, आगम्य। **हन्**-आहत्य। **मन्**-प्रमत्य। **(वनतिः)** प्रवत्य। **(तनोत्यादिः) तन्**-प्रतत्य। **क्षण्**-प्रक्षत्य। इत्यादिकम्।

***आर्यभाषाः** अर्थ-(अनुदात्तोपदेश०) उपदेश अवस्था में अनुदात्त, वनति और तनोति आदि (अङ्गस्य) अंगों के (अनुनासिकलोपः) अनुनासिक का लोप (वा) विकल्प से होता है (ल्यपि) ल्यप् प्रत्यय परे होने पर।*

यह व्यवस्थित-विभाषा है, अतः मकारान्त अंगों का विकल्प से और अन्यत्र अनुनासिक का नित्य लोप होता है।

*उदा०-(अनुदात्तोपदेश) यम्-**प्रयत्य, प्रयम्य।** नियम में करके। रम्-**प्ररत्य, प्ररम्य।** रमण करके। नम्-**प्रणत्य, प्रणम्य।** प्रणाम करके। गम्-**आगत्य, आगम्य।** आकर। हन्-**आहत्य।** धक्का देकर। मन्-**प्रमत्य।** खूब समझकर। (वनति) **प्रवत्य।***

खूब मांगकर। (तनोति) तन्-प्रतत्य। खूब फैलाकर। क्षण्-प्रक्षत्य। खूब हिंसा करके। इत्यादि।

*सिद्धि-(१) **प्रयत्य**। प्र+यम्+क्त्वा। प्र+यम्+ल्यप्। प्र+य०+य। प्र+य तुक्+य। प्र+यत्+य। प्रयत्य+सु। प्रयत्य।*

*यहां प्र-उपसर्गपूर्वक 'यम उपरमे' (भ्वा०प०) धातु से '**समानकर्तृकयोः पूर्वकाले**' (३।४।२१) से 'क्त्वा' प्रत्यय और '**समासेऽनञ्पूर्वे क्त्वो ल्यप्**' (७।१।३७) 'क्त्वा' को 'ल्यप्' आदेश होता है। इस सूत्र से अनुदात्तोपदेश 'यम्' अंग के अनुनासिक का 'ल्यप्' प्रत्यय परे होने पर लोप होता है। '**ह्रस्वस्य पिति कृति तुक्**' (६।१।७०) से 'तुक्' आगम होता है। विकल्प पक्ष में अनुनासिक का लोप नहीं है-**प्रयम्य**।*

*(२) **प्ररत्य, प्ररम्य**। 'रमु क्रीडायाम्' (भ्वा०आ०)।*

*(३) **प्रणत्य, प्रणम्य**। 'णम प्रह्वत्वे शब्दे च' (भ्वा०आ०)।*

*(४) **आगत्य, आगम्य**। 'गम्लृ गतौ' (भ्वा०आ०)।*

*(५) **आहत्य**। 'हन हिंसागत्योः' (अदा०प०)।*

*(६) **प्रमत्य**। 'मनु अवबोधने' (त०आ०)।*

*(७) **प्रवत्य**। 'वनु याचने' (त०आ०)।*

*(८) **प्रतत्य**। 'तनु विस्तारे' (त०उ०)।*

*(९) **प्रक्षत्य**। 'क्षणु हिंसायाम्' (त०उ०)।*

अनुनासिकलोप-प्रतिषेधः-

(३) न क्तिचि दीर्घश्च।३६।

प०वि०-न अव्ययपदम्, क्तिचि ७।१ दीर्घः १।१ च अव्ययपदम्।

अनु०-अङ्गस्य, अनुदात्तोपदेशवनतितनोत्यादीनाम्, अनुनासिकलोप इति चानुवर्तते।

अन्वयः-अनुदात्तोपदेशवनतितनोत्यादीनाम् अङ्गानाम् अनुनासिकलोपो दीर्घश्च न क्तिचि।

अर्थः-अनुदात्तोपदेशानां वनतेः, तनोत्यादीनां चाङ्गानाम् अनुनासिकस्य लोपो दीर्घश्च न भवति, क्तिचि प्रत्यये परतः।

उदा०-(अनुदात्तोपदेशः) यम्-यन्तिः। **(वनतिः)** वन्तिः। **(तनोत्यादिः) तन्**-तन्तिः।

आर्यभाषाः *अर्थ-(अनुदात्तोपदेश०) उपदेश अवस्था में अनुदात्त, वनति और तनोति आदि (अङ्गस्य) अंगों के (अनुनासिकलोपः) अनुनासिक का लोप और (दीर्घः) दीर्घ (च) भी (न) नहीं होता है (क्तिचि) क्तिच् प्रत्यय परे होने पर।*

*उदा०-**(अनुदात्तोपदेश) यम्-यन्तिः।** उपरति। **(वनति) वन्तिः।** मांग। **(तनोत्यादि) तन्-तन्तिः।** गो-समूह।*

*सिद्धि-**(१) यन्तिः।** यम्+क्तिच्। यम्+ति। यन्+ति। यन्तिः।*

*यहां **'यम उपरमे'** (भ्वा०प०) धातु से **'क्तिच्क्तौ च संज्ञायाम्'** (३।३।७४) से 'क्तिच्' प्रत्यय है। इस सूत्र से अनुदात्तोपदेश 'यम्' अंग के अनुनासिक का 'क्तिच्' प्रत्यय परे होने पर लोप नहीं होता है और **'अनुनासिकस्य क्विझलोः क्ङिति'** (६।४।१५) से प्राप्त दीर्घ भी नहीं होता है।*

*(२) **वन्तिः।** **'वनु याचने'** (त०आ०)।*

*(३) **तन्तिः।** **'तनु विस्तारे'** (त०आ०)।*

अनुनासिक-लोपः-

(४) गमः क्वौ।४०।

प०वि०-गमः ६।१ क्वौ ७।१।

अनु०-अङ्गस्य, अनुनासिकलोप इति चानुवर्तते।

अन्वयः-गमोऽङ्गस्यानुनासिकलोपः क्वौ।

अर्थः-गमोऽङ्गस्यानुनासिकस्य लोपो भवति, क्वौ प्रत्यये परतः।

उदा०-अङ्गान् गच्छतीति-अङ्गगत्। कलिङ्गगत्।

आर्यभाषाः *अर्थ-(गमः) गम् (अङ्गस्य) अंग के (अनुनासिकलोपः) अनुनासिक का लोप होता है (क्वौ) क्विप् प्रत्यय परे होने पर।*

*उदा०-**अङ्गगत्।** अंग देश में जानेवाला। **कलिङ्गगत्।** कलिंग देश में जानेवाला।*

*सिद्धि-**अङ्गगत्।** अङ्ग+गम्+क्विप्। अङ्ग+गम्+वि। अङ्ग+ग+वि। अङ्ग+ग तुक्+वि। अङ्ग+ग त्+०। अङ्गगत्+सु। अङ्गगत्।*

*यहां अङ्ग उपपद **'गम्लृ गतौ'** (भ्वा०प०) धातु से **'क्विप् च'** (३।२।७६) से 'क्विप्' प्रत्यय है। इस सूत्र से 'गम्' अंग को 'क्विप्' प्रत्यय परे होने पर अनुनासिक मकार का लोप होता है। तत्पश्चात् **'ह्रस्वस्य पिति कृति तुक्'** (६।१।७०) से 'तुक्' आगम होता है। ऐसे ही-**कलिङ्गगत्।***

विशेषः *(१) अङ्ग-श्री गंगा के तट पर अवस्थित प्राचीन एक प्रसिद्ध राज्य। इस राज्य की राजधानी का नाम चम्पा नगरी था। चम्पा नगरी का दूसरा नाम अनङ्गपुरी भी था। यह चम्पा नगरी आधुनिक भागलपुर के समीप विहार प्रान्त में थी (श०कौ०)।*

(२) कलिङ्ग-उड़ीसा के दक्षिण की ओर का प्रदेश। यह प्रदेश गोदावरी नदी के उद्‌गम स्थान तक फैला हुआ था। इस राज्य की राजधानी कलिङ्गनगर, समुद्र-तट से कुछ फासले पर थी, और सम्भवतः उस स्थान पर भी जहां आधुनिक राजमहेन्द्री नामक नगर है (श०कौ०)।

आकार-आदेशः–

(५) विड्वनोरनुनासिकस्यात्।४१।

प०वि०–विट्-वनोः ७।२ अनुनासिकस्य ६।१ आत् १।१।

स०–विट् च वन् च तौ विड्वनौ, तयोः-विड्वनोः (इतरेतर-योगद्वन्द्वः)।

अनु०–अङ्गस्य इत्यनुवर्तते।

अन्वयः–अनुनासिकस्याङ्गस्य आत्, विड्वनोः।

अर्थः–अनुनासिकान्तस्याङ्गस्य आकार आदेशो भवति, विटि वनि च प्रत्यये परतः।

उदा०–**विट्**-**(जन्)** अब्जाः, गोजा, ऋतजाः, अद्रिजाः। **(सन्)** गोषा इन्द्रो नृषा असि। **(खन्)** कूपखाः, शतखाः, सहस्रखाः। **(क्रम्)** दधिक्राः। **(गम्)** अग्रेगा उन्नेतॄणाम्। **वन्**–विजावा, अग्रेजावा।

आर्यभाषाः *अर्थ-(अनुनासिकस्य) अनुनासिक जिसके अन्त में है उस (अङ्गस्य) अंग के (अनुनासिकस्य) अनुनासिक के स्थान में (आत्) आकार आदेश होता है (विड्वनोः) विट् और वन् प्रत्यय परे होने पर।*

